॥ कौपीनपञ्चकम् ॥

वेदान्तवाक्येषु सदा रमन्तः

भिक्षान्नमात्रेण च तुष्टिमन्तः ।

अशोकवन्तःकरुणैकवन्तः

कौपीनवन्तः खलु भाग्यवन्तः ॥१ ॥

मूलं तरोः केवलमाश्रयन्तः

पाणिद्वयं भोक्तुममत्रयन्तः ।

कन्थामिव श्रीमपि कुत्सयन्तः

कौपीनवन्तः खलु भाग्यवन्तः ॥२ ॥

स्वानन्दभावे परितुष्टिमन्तः

सुशान्तसर्वेन्द्रियवृत्तिमन्तः ।

अहर्निशं ब्रह्मणि ये रमन्तः

कौपीनवन्तः खलु भाग्यवन्तः ॥३ ॥

देहादिभावं परिवर्तयन्तः

स्वात्मानमात्मन्यवलोकयन्तः ।

नान्तं न मध्यं न बहिस्स्मरन्तः

कौपीनवन्तः खलु भाग्यवन्तः ॥४॥

पञ्चाक्षरं पावनमुच्चरन्तः

ब्रह्माहमस्मीति विभावयन्तः ।

भिक्षाशिनो दिक्षु परिभ्रमन्तः

कौपीनवन्तः खलु भाग्यवन्तः ॥५॥